संस्कृत-भवितव्यम्

● निरन्तरं पञ्चषष्टिवर्षाणि प्रकाश्यमानं विश्वस्य एकमेव संस्कृतसाप्ताहिकम् ●

संस्कृत-भाषा-प्रचारि-सभायाः मुखपत्रम्

अङ्क-मूल्यम् रु. ५/- वा. शु. : रु. २५०/-	PRINTED MATTER	वृत्तपत्र-पञ्जीयन-संख्या RN 11454/57
Core Banking Facility : **Name :** Sanskrit Bhasha Pracharini Sabha **A/c No. :** 30362855441 **IFSC/CIF Code :** SBIN0004872	डाकप्रेषण पञ्जीयनसंख्या NGP-27	Postage Licence No. 9
	संपादिका **डॉ. लीना रस्तोगी**	सहसंपादिकाद्वयम् **डॉ. वीणा गानु, डॉ. शारदा गाडगे**

संस्थापक-संपादकः
स्व. डॉ. श्री. भा. वर्णेकर

वर्षम् ६५, अङ्कः ४८
शनि. दि. १३ फेब्रुवारी २०१६,
माघ शु. ६ शके १९३७,
युगाब्द ५११७

ISBN 978-0-00-000978-4
13 Digit ISBN : 978-1-890041-04-5
Barcode ISBN : 978-0-00-000978-4:18900

प्रबन्धिका
डॉ. प्रज्ञा देशपाण्डे
prabandhika.sanskbhavitavyam@gmail.com

प्रकाशकः
डॉ. चन्द्रगुप्त वर्णेकर
०९३७०८०३९१३
cswarnekar@gmail.com

संस्कृत-भवनम्,
२, पश्चिमः उच्च-न्यायालय-मार्गः, नागपुरम् - ४४० ००१.

www.sanskritbps.org

वार्ताः

सुसम्पन्नं मार्तण्डराववाईकर-स्मृतिव्याख्यानम्

ऐषमः चतुर्विंशतितमं व्याख्यानपुष्पमिदं दिल्लीतः समामन्त्रितेन प्राध्यापकेन **डॉ. चन्द्रभूषण झा**वर्येण गुम्फितं शनिवासरे ६ फेब्रुवारीदिनाङ्के संस्कृतभवनपरिसरे। महोदयेन संस्कृत-पत्रकारितायां भाषा-प्रयोगः कथं करणीयः, काः सन्ति समस्याः? सार्धशताब्दे कथं संस्कृत-पत्रकारितायाः सुदृढः विचारः करणीयः इति सुष्ठु प्रतिपादितम्। सभाध्यक्षाः **डॉ. लीना रस्तोगी** आध्यक्ष्यमकरोत्। प्रसङ्गे अस्मिन् अब्दुलकलामविषयक-संस्कृतनिबन्ध-स्पर्धासहभागिभ्यः पारितोषिक-वितरणमपि झावर्याणां करकमलाभ्यां अभूत्। सचिवेन **डॉ. चन्द्रगुप्त वर्णेकरेण** प्रास्ताविकं, **डॉ. सौ. स्मिता होटे**वर्यया च सूत्र-सञ्चालनं विहितम्। वाईकरपरिवारतः श्री. शरदः, घाणेकरदम्पती प्रभृतयः समुपस्थिताः आसन्। पञ्चाशदधिकसङ्ख्यया सुविद्येन श्रोतृवर्गेण व्याख्यानविषये समाधानं प्रकटीकृतम्।

■ **शुक्लयजुर्वेदस्य काण्वशाखायाः घनपाठः** ऐषमः २६ जानेवारीतः ९ फेब्रुवारीपर्यन्तं नागपुरे लक्ष्मीनगरे सिद्धहनुमन्मन्दिरपरिसरे सञ्जातः। भौमवासरे सायंकाले उपक्रमस्यास्य समापनावसरे महर्षिवेदव्यासप्रतिष्ठानस्य आचार्यः **गोविन्दगिरिमहाराजः**, राष्ट्रियस्वयंसेवक-सङ्घस्य सरसङ्घचालकः **डॉ. मोहनभागवतः**, देवनाथपीठाधीश्वरः **जितेन्द्रनाथश्च** अमूल्यं मार्गदर्शनं कृतवन्तः। स्वर्गीयाणां वेदमूर्तिमनोहरशास्त्रिजोशीवर्याणां यः महर्षिवेदव्यासपुरस्कारः उद्घोषितः आसीत् तं तस्य पत्नी पद्ममाला स्वीकृतवती। ढालगांव (परभणी) वेदपाठशालायाः वेदमूर्तिः **डॉ. विजयकुमारपट्टजोशी** अपि अनेन पुरस्कारेण सभाजितः। 'अखिले विश्वे यः पुनरुत्थानतरङ्गः प्रस्फुटितः दरीदृश्यते तस्य एव गन्तव्यं भवति तेजस्विनी वेदवाणी इति स्वामिना गोविन्दगिरिणा प्रतिपादितम्। विना वेदं कुतो भारतः? इत्येवं पृच्छा भागवतवर्येण कृता। वेदाध्ययनेनैव विज्ञानाध्ययनं परिपूर्णं भवति इति जितेन्द्रनाथः अवदत्।

■ **चिरञ्जीवति हिमालयवीरः हनुमन्तप्पा कोप्पड -** लड्डाखविभागे देशरक्षां कुर्वन् असौ वीरसैनिकः हिमस्खलनेन अष्टमीटरघनहिमस्तरतले षड्दिनानि यावत् निक्षिप्तोऽभूत्। ९ फेब्रुवारीदिनाङ्के समासादितः हनुमन्तप्पा ११ फेब्रुवारीदिनाङ्के सेवारुग्णालये स्मृतिशेषः भूत्वा भारतीयानामन्तःकरणे चिरञ्जीवति।

■ **डेव्हिड् हेडली उपाख्य दाऊद गिलानिः** मुम्बय्यां २६/११ दिवसस्य आतङ्कप्रहारविषयं स्फुटीकरोति। सः यद्यपि लष्कर-ए-तोयबातङ्कगटसंबद्धः भवति, तथापि आय्एस्आय्, पाक गुप्तचरसंस्था, जैश-ए-मोहम्मद, हिज्बुल् मुजाहिदीन प्रभृतिभिः संस्थाभिः सह निधि-शस्त्रास्त्रादिपूरणेषु अपि संलग्नः आसीत्। सम्प्रति पञ्चत्रिंशत्वर्षाणां कारावासेन दण्डितः असौ अमेरिकायां कारागृहे बद्धः अस्ति।

■ **राज्यपालानां द्विदिवसीयं सम्मेलनम्** भौमवासरे ९ फेब्रुवारीदिनाङ्के राजधान्यां नवदिल्यां प्रारब्धम्। घटनायाः समृद्ध-सिद्धान्तानां परिपालनेनैव सुदृढः अस्माकं देशः आतङ्कवादः, आर्थिकमान्द्यं, पर्यावरणम् आदीनां वैश्विकसमस्यानामपि समाधानं कर्तुं क्षमः भवितुमर्हति। इति राष्ट्रपतिः प्रणवमुखर्जी अवोचत्।

तावदेव प्रतिष्ठा स्याद् भारतस्य महीतले।
ज्ञानामृतमयी यावत् सेव्यते सुरभारती॥

सम्पादकीयम्

नवयुवकान् प्रतीक्षते संस्कृतपत्रकारिता

ऐषमे नाम २०१६ तमे वर्षे संस्कृतपत्रकारिता सार्धशतवर्षीया भवति। भारतवर्षस्य पुण्यभूमौ श्रीमतः काशीविश्वेश्वरस्य निवासनगरे काशीक्षेत्रे 'विद्यासुधानिधिः' इत्यनया पत्रिकया जाता इयं संस्कृत-पत्रकारिता अद्य विशेषरूपेण संस्कृतानुरागिजनम् आकर्षयति इत्ययं महतः प्रमोदस्य विषयः। अर्वाचीनकाले मुद्रितपत्रिकाणां रूपेण दृग्गोचरा इयं पत्रकारिता प्राचीनकाले वाङ्मात्रेण प्रचलिता आसीत्। देवर्षिः नारदः आद्यः वार्ताहरः। वीणां वादयन् मुखेन 'नारायण, नारायण' इति जपन् स्वकीयां विष्णुभक्तिं प्रदर्शयन् एष देवर्षिः स्वर्गे, पाताले, पृथ्वीतले सर्वत्र भ्रमति स्म। किन्तु नासीत् एतद् त्रैलोक्यभ्रमणं निष्प्रयोजनम्। अपि तु वार्ता-प्रसारणम् इत्येव कार्यं सदैव करोति स्म तत्रभवान् नारदः। तस्य नैकाः कथाः पुराणेषु उपलभ्यन्ते। रामायणकाले भगवता हनुमता वार्ताहरस्य कार्यमनुष्ठितम्। रावणस्य लङ्कापुरीं गत्वा भगवतीं सीतामन्विष्य श्रीरामस्य कुशलवार्ता तेन रामभक्तेन सीतादेवीं श्राविता। महाभारते हंसेन नलराजस्य दौत्यं स्वीकृत्य तस्य सन्देशः दमयन्तीं प्रति नीतः। मेघदूते महाकविना कालिदासेन तु मेघः दूतरूपेण स्वकीयां विरहिणीं भार्यां प्रति प्रेषितः आत्मनः कुशलवृत्तान्तं ज्ञापयितुं तस्याश्च कुशलत्वं ज्ञातुम्। अन्यत्रापि वार्ताहराणां दूतानां च उल्लेखाः दरीदृश्यन्ते।

प्राचीनकाले यातायातसाधनानां तथा च यन्त्राणाम् अभावात् वार्ताहरस्य एतत् कार्यं दुष्करं, श्रमापेक्षि, कालव्ययकारकं चासीत्। अद्यतनकाले तु तन्त्रज्ञानस्य प्रगतिः पत्रकारिताक्षेत्रं नितराम् उपकरोति इत्यत्र नास्ति संशयः। अतः एव १८५६ तमे वर्षे काशीक्षेत्रे आरब्धा संस्कृतपत्रकारितातरङ्गिणी अद्य भरतवर्षे वेगेन प्रवहन्ती दृश्यते। गतेषु सार्धशतवर्षेषु भारतवर्षस्य विविधेषु नगरेषु शतशः संस्कृतपत्रिकाणां प्रकाशनम् आरब्धम्। तासु काश्चन कालप्रवाहे विलुप्ताः, काश्चन अद्यापि प्रचलन्ति। संस्कृतपत्रिकाणां विलोपस्य कारणानि नैकानि। क्वचित् धनाभावः, क्वचित् जन्मदातुः निधनं, क्वचित् साधनानाम् अनुपलब्धता। विशेषतः याभिः पत्रिकाभिः आंशिकरूपेणापि शासनस्य अधिकं साहाय्यं प्राप्तं ताः पत्रिकाः चिरं जीवन्ति इति वक्तुं शक्यते। एतासु बद्धमूलासु प्रौढासु सुविख्यातनामधेयासु पत्रिकासु अस्माकं 'भवितव्यस्य' अन्तर्भावः इत्ययं महतः आनन्दस्य अभिमानस्य च विषयः।

तन्त्रज्ञानक्षेत्रं सम्प्रति प्रतिदिनं विकसनशीलं दृश्यते। एष विकासः संस्कृतपत्रकारिताक्षेत्रमपि समायातः। मुद्रितपत्रिकाभिः सह आकाशवाणी तथैव दूरदर्शनम् इत्यत्रापि संस्कृतवार्ताः आरब्धाः। १९७४ तमे वर्षे दिल्ली-आकाशवाणी-केन्द्रे संस्कृत-वार्ता-प्रसारणं प्रारब्धम्। प्रतिदिनम् आकाशवाणीयन्त्रे ''इयम् आकाशवाणी। सम्प्रति वार्ताः श्रूयन्ताम्। प्रवाचकः बलदेवानन्दसागरः अथवा प्रवाचिका विजयश्रीः'' एतानि वाक्यानि संस्कृतानुरागिणां हृदयेषु नितरां हर्षम् अजनयन्। १९९४ तमे वर्षे दूरदर्शनकेन्द्रेणापि एष उपक्रमः अङ्गीकृतः प्रगतिपथं च नीतः। नवनवैः उपक्रमैः संस्कृतप्रेमिणः च आकृष्टाः।

संस्कृतपत्रकारितायाः इदं क्षेत्रं नूनं वैशिष्ट्यपूर्णं, अनन्यसाधारणं महत्त्वपूर्णं च। ''संस्कृताध्ययनस्य जीवने न कोऽपि लाभः'' इति चिन्तयन् संस्कृतपराङ्मुखिनः भवन्ति छात्राः विशेषतः युवकाः। तैः एष अविचारः सर्वथा त्याज्यः। संस्कृतं सम्यक् अधीत्य पत्रकारिताक्षेत्रं प्रवेष्टव्यम्। यशश्रीः स्वयमेव वृणुते प्रयत्नशीलपुरुषम्। अस्मिन् क्षेत्रे पदं कर्तुं यथा संस्कृतभाषायाः, विशेषतः व्याकरणस्य ज्ञानम् आवश्यकं तथैव मातृभाषायाः अपि ज्ञानम् अपेक्षितम् अस्ति। विविधभाषाज्ञः एव वार्तानाम् अनुवादे कौशलं प्राप्तुमर्हति। पत्रकारिताक्षेत्रे काऽपि सूक्ष्मतरा भाषिकदृष्टिः महत्त्वपूर्णं स्थानं भजते। कामपि वार्तां कथयितुं भिन्न-भिन्नानां शब्दानां योजना सम्भवति। तेषां सूक्ष्मार्थानां विचारः सदैव मनसि चिन्तनीयः पत्रकारैः। विविधशब्दानां यथायोग्यः प्रयोगः वाचकान्, श्रोतृवृन्दं, प्रेक्षकान् च तोषयति। वार्तापटले, विशेषतः संस्कृतवार्तापटले श्रवणे, प्रेक्षणे वा कोऽपि अनन्यसाधारणः आनन्दानुभवः जनान् संस्कृतं प्रति आनेतुं महत्त्वपूर्णः। अन्यच्च संस्कृतवार्तासु आङ्ग्लशब्दानाम् अन्यभाषिकशब्दानां च प्रयोगः यावच्छक्यं परिहर्तव्यः। नूनम् अतिसमृद्धा अस्माकम् अमृतवाणी। एकैकस्य शब्दस्य नैकान् पर्यायान् कथयति अमरकोषः। तेषाम् उपयोगः सदैव स्वागतार्हः। क्वचित् आधुनिकवस्तूनां संस्कृतशब्दाः न प्राप्यन्ते इति सत्यम्। तदर्थं स्वयं चिन्तनेन अथवा ज्येष्ठानां संस्कृतज्ञानां मार्गदर्शनेन नवशब्दाः निर्मातव्याः नव-संस्कृतपत्रकारैः। अनेन उपक्रमेण अस्माकं ज्ञानामृतमयी संस्कृतवाग् अधिकतरां समृद्धिम् अधिगच्छेत्। भाषायाः शब्दवैभवं च देदीप्यमानं भवेत्। यथार्थ-शब्दानां प्रयोगेण अन्यभाषिकशब्दानां परिहारेण वार्तानामपि भाषासौन्दर्यं वृद्धिं गच्छेत्। संस्कृतपत्रकारैः प्रसृताः वार्ताः न केवलं वार्ताः अपि तु जिज्ञासूनां कृते भाषापाठरूपाः एव भवन्ति। संस्कृतसम्भाषणे, संस्कृत-वाक्यरचनायां वा धृतरुचयः छात्राः जनाश्च प्रत्येकं शब्दं नूनं हृदि धारयन्ति, तस्य प्रयोगेण आनन्दं च अनुभवन्ति। तेषां कृते अस्माकं संस्कृतपत्रकारिता नूनं पथप्रदर्शकः दीपस्तम्भः एव। संस्कृतप्रचारार्थं गृहीतव्रताः संस्कृतज्ञाः युवकाः संस्कृतपत्रकारिताक्षेत्रं प्रविश्य संस्कृतपत्रकारितां विश्वे शिखरयन्तु। संस्कृतपत्रकारिता जरामरणजभयात् मुक्ता इत्यत्र नास्ति शङ्कालेशः।

यावत्स्थास्यन्ति गिरयः सरितश्च महीतले।
संस्कृतपत्रकारितेयं लोकेषु प्रचरिष्यति॥

इति सत्यमेव। इयं चिरजीविनी संस्कृतपत्रकारिता संस्कृतज्ञानां ज्येष्ठानां नवयुवकानां च विशेषतः अवधानं प्रतीक्षते।

डॉ. शारदा गाडगे

स्वप्नशिल्पम्

स्पर्शगणपटलः (टच् स्क्रीन्)

तद्दिने वनविहाराय मातुलस्य कृषिक्षेत्रं समायातः नवीनः तत्र पुष्पवाटिकायां कुतूहलेन स्तबकैः नम्राणां तरु-वल्लरी-विटपानां सूक्ष्मावलोकने मग्नः आसीत्। कञ्चन विटपं स्पृशन् तेनानुभूतं यदकस्मात् तस्य लघु-लघूनि पर्णानि निमील्यन्ते इति। ''सा लज्जावती भोः!'' चकितं नवीनं दूरतः पश्यन्ती तस्य मातुलानी सूचितवती। यावत् अपराणि तानि लघुपर्णानि नवीनः अस्पृशत् तावत् कालान्तरेण पूर्वनिमीलितानि पत्राणि पुनश्च उन्मील्यन्ते स्म। एषा स्पर्शक्रीडा नवीनाय भृशमरोचत।

रात्रौ तत्रैव क्षेत्रगृहे कृष्युत्पादनैः सिद्धं भोजनं मातुलेन समायोजितमासीत्। यतो हि सप्ताहपूर्वं कार्यवशात् सिंहपुरं (सिङ्गापुरं) प्रयातो नवीनस्य पिता अपराह्णे एव प्रत्यागतः आसीत्। वायुयानस्थानकात् साक्षात् अत्र आगत्य सः विशिष्ट-भोजनेऽस्मिन् सहभागी अभवत्। भोजनावसरे वार्ताप्रसङ्गे तस्मात् देशात् समानीतं नूतनं स्पर्शगणपटलयुक्तं (टच्स्क्रीन्) चलदूरभाषयन्त्रं (मोबाइल्) तेन प्रदर्शितम्। सामान्यं तादृशं दूरभाषयन्त्रं नवीनेन यद्यपि पुरा उपयोजितमासीत्, तथापि एषः स्पर्शप्रयोगः खलु चमत्कार इवासीत् तस्य कृते। यथाशीघ्रं भोजनं समाप्य तं गणपटलं विविधैः प्रकारैः भृशं स्पृष्ट्वा चित्रावलोकनेन चकितः नवीनः तत्रैव बृहदासन्दिकायां (कोच उपरि) निद्राधीनोऽभूत्। तं मञ्चे निद्रापयित्वा तस्य माता पुनश्च भोजनकक्षमागत्य वार्तालापे सहभागिनी अभवत्।

''... भोः! ऽऽनवीनऽऽ!'' इति सम्बोधनमाकर्ण्य सः नवीनः यदा अत्र तत्र अवलोकयति तदा ''रे! अत्र भोः! भोजनकक्षे, तव पित्रा अत्रैव निक्षिप्तम् अहं नूतनं दूरभाषयन्त्रं भाषे!'' इति ब्रुवत् अन्धकारे प्रकाशितं तत् स्पर्शगणपटलं नवीनेन दृष्टम्।

''तदा मां प्रथमतः स्पृष्ट्वा त्वं चकितः अभवः इति मत्वा मद्विषये किञ्चित् कथयितुमुत्सहे। अपि श्रोतुमिच्छसि?...''

''आम्! तथैवासीत् मे जिज्ञासा'' इति वदन् नवीनः धावन् तत्र भोजनकक्षमगच्छत्।

''प्रातः पुष्पवाटिकायां तवाङ्गुलिस्पर्शेण यथा लज्जावत्याः पर्णानि निमील्यन्ते स्म, तथैव स्पर्श-प्रचोदिता वर्तते मम एषा दर्पणवत् त्वग्रचना। सा लज्जावती सजीवा वनस्पतिः भवति अतः स्वपेशी-जालमयीं त्वचमुपयुज्य स्पर्शं ज्ञात्वा सा स्वपत्राणि निमीलयति। नूनं मात्रास्पर्शास्तु शीतोष्णसुखदुःखदाः भवितुमर्हन्ति एव इति श्रीमद्भगवद्गीतया अपि सूचितमस्ति किल। सम्प्रति तु नवविज्ञानतन्त्रैः विनिर्मितानां पारदर्शकपत्राणां विशिष्टैः स्तरैः संसाधिता एषा मम त्वग्रचना विद्युदूर्जाम् उपयुज्य ममान्तःस्थेन लघुसङ्गणकयन्त्रेण स्पर्शं ज्ञातुं शक्नोति।



पश्यतु अत्र चित्रे - ''इत्युक्त्वा स्वपटले चित्रमिदं तेन प्रदर्शितम्।

''एषा स्तरीया रचना अल्पमात्रं विद्युद्भारधारणक्षमा वर्तते। कराङ्गुलिस्पर्शमात्रेण तस्मिन् स्थाने सन्धारितस्य विद्युद्भारस्य परिवर्तनं भवति। परिवर्तनमिदम् अन्तःस्थेन लघुयन्त्रेण ज्ञात्वा प्रतिरूपः गणक्रमः (प्रोग्रॅम्) प्रचोद्यते। तदनुसृत्य लेखं वा चित्रं वा त्वमस्मिन् पटले पश्यसि। कराङ्गुल्याः स्पर्श-प्रकाराः भिन्नाः भवन्ति; यथा कराङ्गुलिप्रहारः (टॅप्), लघुचपेटः, पृष्ठे अवकर्षणम् (ड्रॅग्), कराङ्गुल्याः भ्रमणम्, कराङ्गुलिद्वयेण स्पर्शः इत्यादयः। विविधैः तादृशैः स्पर्शप्रकारैः विद्युद्भारस्य परिवर्तनमपि भिन्नं भवति। यन्त्रेण तत् सम्यक् अवगम्य तदनुसृत्य विभिन्नाः गणप्रक्रियाः प्रारभन्ते। यथा सङ्गृहीतस्य लेखस्य/चित्रस्य वा प्रदर्शनम्, दूरभाषयन्त्रेण सह संयोजनम्, गणजालसेवा, सङ्गीतम्, चित्रपटः वा इत्यादयः गणप्रक्रियाः विशिष्टे स्थाने पटलं स्पृष्ट्वा साध्यन्ते। प्रायः गणपटले स्थाने स्थाने सूचकं चित्रम् (आयकॉन्) अपि विद्यते, येन अपेक्षितं प्रक्रिया-चयनं सुलभं स्यात्। गणपटलस्य प्रत्येकं स्थानं स्पर्शमात्रेण विशिष्टां प्रतिरूपां सङ्ख्यां जनयति, तामनुसृत्य गणक्रमप्रकाराः, प्रक्रियाश्च भिन्नाः भवन्ति। एवं मम स्पर्शगणपटलस्य स्तरीया अभिनवा संरचना अतीवं महत्त्वं भजते। तथैव पटले स्पर्शस्थानं, स्पर्शप्रकारः वा अन्तःस्थस्य सूक्ष्म-सङ्गणकयन्त्रस्य प्रतिरूपं गणक्रमं प्रारभ्य यथेष्टं कार्यं साधयति। परिणामवशात् अत्र गणपटले तादृशं चित्रं त्वं पश्यसि, सङ्गीत-ध्वनिं वा शृणोषि भोः! ...''

तदा एव अकस्मात् स्वमातुः करस्पर्शं सम्यगवगम्य ''भोः! नवीन् प्रभातकालः भवति। जागृहि रे! ऽऽ मातुलस्यास्य कृषिक्षेत्रात् अस्माकं गृहं प्रतिगन्तुं यानं सिद्धमस्ति। इति ध्वनिमाकर्ण्य नेत्रे मृजन् जागरूकः नवीनः धावन् पितुः नूतनं स्पर्शगणपटलयुतं दूरभाषयन्त्रं गृहीत्वा किमर्थमवलोकयति स्पृशति च वारंवारम् इति नैव ज्ञातवती तस्य माता।

डॉ. चन्द्रगुप्त वर्णेकरः

वार्ता:

■ ''श्रीमद्-भगवद्-गीता'' नाम योगेश्वर-श्रीकृष्णार्जुन-संवाद-रूपः ज्ञानमयः प्रदीपः, भगवता बादरायणेन व्यासेन ''महाभारते'' प्रज्वाल्य, अशेषमानवतायाः लाभार्थम् उपायनीकृतोऽस्ति। परमोपकारकमिदं भगवद्-गीतम् आधृत्य अनेकैः विद्वद्भिः भाष्यकारैः चिन्तकैः विचारकैः विश्वनेतृभिश्च काले काले विविधाः टीकाः, विविधानि भाष्याणि च विविधासु भाषासु विरचितानि। तेषु अन्यतमेन राष्ट्रपित्रा महात्मगान्धिना मोहनदास-करमचन्द-गान्धिना ''अनासक्ति-योगः'' इति स्वीय-जीवनाचरणस्य अनुभवाधारेण विरचितं सरलं सर्वजनोपयोगि च गुजराती-भाषिकं भाष्य-जातमतितरां विलसति आधुनिके जगति। अधुनावधि गुजराती-भाषिकस्य ''अनासक्ति-योग''स्य सार्द्धैक-लक्षाधिक-प्रतयः विक्रीताः जाताः। ततः परम् अपरासु अनेकासु भाषासु अनूदितोऽयं ग्रन्थः सुख्यातेन संस्कृत-विदुषा महामहोपाध्यायेन आचार्येण डॉ. गौतम-पटेलेन साम्प्रतं संस्कृत-भाषायां अनूदितः, उत्तराखण्ड-विश्व-विद्यालयेन च प्रकाशितः। स च ''अनासक्ति-योगः'' इति संस्कृत-ग्रन्थः अमदावादे राज-भवने वैशिष्ट्येन समुपकल्पिते एकस्मिन् समारोहे गुजरातस्य महामहिमशालिना राज्यपालेन डॉ. ओ. पी. कोहलीवर्येण लोकाय समर्पितः। अवसरेऽस्मिन् समुपस्थितेषु विशिष्टजनेषु ''श्रीसोमनाथ--संस्कृत-विश्व-विद्यालयस्य कुलपतिः प्रो. अर्कनाथ चौधरी, उत्तराखण्ड-विश्वविद्यालयस्य कुलपतिः प्रो. महावीर-अग्रवालः, संस्कृत-सेवा-समितेः संस्थापकाध्यक्षः, महामहोपाध्यायः डॉ. गौतम-पटेलः, साबरमतीस्थस्य गान्धि-आश्रमस्य सचिवः श्री-अमृतभाई-मोदी चान्यतमाः आसन्।

● वार्ता-प्रेषकः - **बलदेवानन्द-सागरः**

पाठकस्य पत्रम्

मान्याः सम्पादक-महाभागाः,

नमोनमः। **'संस्कृत-भवितव्यम्'** (४५-४६-अङ्कौ) पठित्वा सन्तोषमानन्दञ्च अनुभवामि। अस्य अङ्कस्य द्वितीय-षृष्ठे च प्रकाशितं 'सम्पादकीयम्', चतुर्थे पृष्ठे च प्रकाशितं 'सार्थक-नदीनामानि' इति द्वयमपि अतितरामुपयोगि, संस्कृत-पत्रकारितायाः चालङ्कारत्वेन वर्तते। एतदर्थम् अत्रभवान्, आचार्यः अभिराज-राजेन्द्र-मिश्र-वर्यः चाभिनन्दनीयौ। एतादृशाः लेखाः संस्कृत-पाठकान् अपि सामयिक-विषय-सम्बद्धं चिन्तयितुं सततं प्रेरयिष्यन्ति इति मन्ये।

जान्युआरि-मासे नवमे दिनाङ्के नागपुरे **'संस्कृत-भवितव्यम्'**-द्वारा समायोजिता एकदिवसीया संस्कृत-पत्रकारिता-कार्यशाला सर्वेषां छात्राणां संस्कृतानुरागिणां च कृते उत्साह-प्रदायिनी समुपयोगिनी च सिद्धेति वृत्तं मोदावहम्।संस्कृत-पत्रकारितायाः सार्ध-शती-विषयकः भवत्-प्रस्तावः सक्रियं विचार्यते।

साम्प्रतं ६-फरवर्याम् श्रीमार्तण्ड-वाईकर-स्मृति-व्याख्यान-मालायां नागपुरे आचार्येण डॉ. चन्द्रभूषण-झा-वर्येण प्रदीयमानाय व्याख्यानाय अभिनन्दनानि। तद्-विषयकेषु विज्ञापनेषु 'भारतीय-संस्कृत-पत्रकार-संघस्य कोषाध्यक्षः' इति लिख्यतं चेत्, साधु!!

सादरम् - **बलदेवानन्द-सागरः**

रहस्यं साधु जानेऽहम्!

कदाचित्सौधशृङ्गस्थोऽपि काको नैति तार्क्ष्यत्वम्
न दोषो मृष्यते यत्नैः रहस्यं साधु जानेऽहम्॥१॥
समुत्थेयं कुतो वात्या किमर्थं किङ्कृतेयं वा
गृहेऽग्निः केन सन्दीप्तः किमर्थश्चेति जानेऽहम्॥२॥
विधानं चाटुभिर्भुङ्क्ते बली स्तम्बेरमः कस्मात्
धुनीते वा कथं श्वा पुच्छमित्यपि साधु जानेऽहम्॥३॥
क्वचिद् रामः क्वचिद् रोटी क्वचित्सर्वोदयाऽऽकाङ्क्षा
अभिप्रायञ्च युष्मद्भाषणानां भूरि जानेऽहम्॥४॥
भृशं निर्भर्त्सितः कर्णिकपदैरपि, राजनीतौ त्वम्
यथा काष्ठाधिरूढस्तत् प्रतिष्ठामर्म जानेऽहम्॥५॥
हृदिस्थं कालकूटं यन्निगूह्योद्गिरसि पीयूषम्
प्रयतसे छलयितुं युक्त्याऽभिराजं तच्च जानेऽहम्॥६॥
क्वचिद्रक्तः क्वचित्पीतः क्वचिद्वा कर्बुरः कृष्णः
कथं कृकलासतामेषि व्रतन्ते तात! जानेऽहम्॥७॥
जितं त्वेकं जगत्सर्वं यया कलया महामायिन्
रहस्यं कृष्णवस्त्राणां त्वदीयं हन्त जानेऽहम्॥८॥
घनैरस्मादृशां कण्ठाः पिकानां स्तम्भिता नूनम्
ध्रुवन्ते शबरवाचामवसरोऽयं साधु जानेऽहम्॥९॥

● **डॉ. अभिराज राजेन्द्र मिश्रः,** पूर्वकुलपतिः, सिमला (हि.प्र.)

॥वामनमूर्तये बटवे नमः॥

अजिन-दण्ड-कमण्डलु-मेखला
रुचिर-पावन-वामन-मूर्तये।
मित-जगत् त्रितयाय जितारये
निगम-वाक्-पटवे बटवे नमः॥

आशीर्वादः - **पं. वसन्त अ. गाडगीळ,** पुणे

संस्कृत-भाषा-प्रचारिण्याः सभायाः इदं साप्ताहिकं डॉ. चन्द्रगुप्त वर्णेकरः इत्यनेन सभायाः सचिवेन कृष्णचंद्र एजन्सीज,
नागपुरम् इत्यत्र मुद्रापयित्वा संस्कृत-भवने २, पश्चिम-उच्च-न्यायालय-मार्ग, नागपुरे प्रकाशतां नीतम्।